# Brahmana Kritam 2 Vishnu Stotram

# ब्रह्मणा कृतं २ विष्णुस्तोत्रम्

## Document Information

Text title : Brahmana Kritam 2 Vishnu Stotram

File name : brahmaNAkRRitaM2viShNustotram.itx

Category : vishhnu, vishnu, brahmapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 181/21-25||

Latest update : September 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 29, 2024

*sanskritdocuments.org*

# ब्रह्मणा कृतं २ विष्णुस्तोत्रम्

ब्रह्मोवाच ।
नमो नमस्तेऽस्तु सहस्रमूर्ते सहस्रबाहो बहुवक्त्रपाद ।
नमो नमस्ते जगतः प्रवृत्तिविनाशसंस्थानपराप्रमेय ॥ २१॥

सूक्ष्मातिसूक्ष्मं च बृहत्प्रमाणं गरीयसामप्यतिगौरवात्मन् ।
प्रधानबुद्धीन्द्रियवाक्प्रधानमूलापरात्मन्भगवन्प्रसीद ॥ २२॥

एषा मही देव महीप्रसूतैर्महासुरैः पीडितशैलबन्धा ।
परायणं त्वां जगतामुपैति भारावतारार्थमपारपारम् ॥ २३॥

एते वयं वृत्ररिपुस्तथाऽयं नासत्यदस्रौ वरुणस्तथैषः ।
इमे च रुद्रा वसवः ससूर्याः समीरणाग्निप्रमुखास्तथाऽन्ये ॥ २४॥

सुराः समस्ताः सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वम् ।
आज्ञापयाज्ञां प्रतिपालयन्तस्तवैव तिष्ठाम सदाऽस्तदोषाः ॥ २५॥

इति ब्रह्मपुराणे एकाशीत्यधिकशततमाध्यायान्तर्गतं
ब्रह्मणा कृतं विष्णुस्तोत्रं समाप्तम् ।

ब्रह्मपुराण । अध्याय १८१/२१-२५॥

brahmapurANa . adhyAya 181/21-25..

Proofread by PSA Easwaran

Please send corrections to *sanskrit@cheerful.com*